प्रवेश सं० ११९१६

विषय: धर्मशास्त्रम्

क्रम सं०

नाम विद्वन्मनोहरा (पराशरस्मृतिटीका) ५ अध्याय.

ग्रन्थकार धर्माधिकारि-विनायकपण्डित

पत्र सं० १–७

श्लोक सं०

अक्षर सं० (पंक्तौ) ४२

पंक्ति सं० (पृष्ठे) ११

आकार: ११.५ × ४.२

लिपि: दे.ना.

आधार: का०

वि० विवरणम् सं०

१३४८१

पी० एस० यू० पी० — ९९ एस० सी० ई० — १९५९ — ५० ००० नं० ३५३२

१४२

Indira Gandhi National Centre for the Arts

प्रि॰रा॰५
॥१॥

॥ ॥श्रीगणेशायनमः॥ ॥वामेनोल्लिप्यगोवर्धनमखिलसुरनिन्यस्तदृष्टिःकरेणप्रत्यालंब्यावनम्रीसवदिवसरसा
दक्षिणेनस्वमध्यं।श्रावाराबद्धस्फुरद्धासुकरपरिकरस्तत्क्षणेनांबुजाक्षःपायादायासखिन्नःपतिरिति सदयथी
धरःश्रीधरोवः॥१॥धर्माधिकारिकुलकैरवकाननेंदुश्रीरामपण्डितसुतेनविनायकेन॥संस्कारसिद्धिमलिधातुमिह
हिताम्नेरारभ्यते विवरणंकिलएवमेषि॥२॥चतुर्थाध्यायेप्रकीर्णकपातकप्रायश्चित्तप्रसक्तानुप्रसक्तप्रपुत्रसे
दाग्निसहगमनांतनिरूपणानबुद्धिस्थमाहितागिसंस्कारंप्रपंचयितुंपंचमाध्यायमारभते॥तत्रप्रकीर्णकप्रायश्चित्त
प्रकरणविच्छेदायतदेवतावदाह॥वृकश्वानसृगालाद्यैर्दष्टोयस्तुद्विजोत्तमः॥स्नात्वाजपेत्सगायत्रीपवित्रांवेदमा
तरं॥१॥वृकआरण्यःश्वाश्राकुकुरःसृगालोजंबुकः आदिशब्देननरखरवानरवराहादीनांग्रहणं एतैर्दष्टोद्वि
जोत्तमोब्राह्मणःस्नानानंतरमष्टोत्तरशतवारंगायत्रींजपेत्‌।तदाहोशनाः॥दंष्ट्रादिदष्टोगायत्र्यष्टशतंप्राणायाम
शतंवेति॥यत्तुश्वसृगालमहिषाजाविकखरकरभनकुलमार्जारमूषिकाप्लवकाकपुरुषदष्टानामापोहिष्टादिभिः श्रा॰कृ॰
स्नानंप्राणायामत्रयंवेतिसुमंतुस्मरणंतन्नासेरधःप्रदेशेदष्टदंशविषयं॥नाभेरूर्ध्वंसम्यग्दंशेतुमरुत्कोक्तमेव ॥१॥
द्विगुणादिकल्पनीयं॥तथाचांगिराः॥नाभेरूर्ध्वंतुदष्टस्यतदेवद्विगुणंभवेत्‌॥स्यादेतत्त्रिगुणंवक्त्रेमस्तकेतुचतुर्गु

णमिति॥गायत्र्याःपावित्र्यातिशयद्योतनायविशिनष्टि॥वेदमातरमिति॥वेदानांमातागायत्रीछंदसांमातेतिस्मरणाद्वा॥वे
दामातरोयस्याःसेतिवा त्रिस्यएवतुवेदेभ्यःपादंपादमदूदुहत्‌॥तदित्यृचोस्याःसावित्र्याःपरमेष्ठीप्रजापतिरितिस्मरणा
त्‌ एतच्चगृहस्थविषयं यतिशेषाणस्यते-स्नातकादेरप्येविशेषाभिधानात्‌॥एवंब्राह्मणस्यप्रायश्चित्तमुक्त्वाक्षत्रियादी
नांतदाह॥गवांशृंगोदकस्नानान्महानद्योस्तुसंगमात्‌ समुद्रदर्शनाद्वापिशुनादष्टःशुचिर्भवेत्‌॥२॥गोशृंगोदकस्नाने
गायत्र्याशतवाराभिमंत्रितेनगोशृंगस्थितेनोदकेनाप्लावनंतस्मात्‌ तदाहहारीतः॥गोशृंगेणशतंस्नानंगायत्र्येति।
समुद्रगेमहानद्योतयोःसंगमेनिकटवर्तिनिस्नानात्‌ सन्निहितस्यसमुद्रस्यदर्शनाद्वा स्यादिदष्टःक्षत्रियादिःशु
चिर्भवेद्वाक्याद्धोव्यवस्थितविकल्पार्थःयद्यप्यत्रक्षत्रियादिपदंनश्रूयतेतथापिपूर्वत्रब्राह्मणस्यप्रायश्चित्ताभि
ना४ धानोदवशिष्टानांत्रयाणांप्रायश्चित्तानांस्थानक्रमेणक्षत्रियादिविषयत्वंपर्यवस्यतिवानुवर्ण्यधर्मप्रवचनस्यप्रतिज्ञा नि४
तत्वात्‌।एतदेसंसंवहारीतोक्तं स्वानोवाक्रोष्टुकोवापिनारीवायदिवानरः॥आखुर्नकुलमार्जारौवायसग्राम्यसूकरः
एतैर्दष्टेद्विजस्यांगेप्रायश्चित्तंकथंभवेत्‌॥स्नानंकुर्यात्सचैलंतुविप्राणामनुशासनात्‌॥जोरुणीनिस्तिस्रभिःत्रा
ग्निःकारयेन्मार्जनंद्विजः।प्राणायामत्रयंकुर्याद्घाऊोभ्युक्षणंनरः॥सहद्विजेस्तुयुक्तेनशुध्यतेनात्रसंशयइतिद्व

Indira Gandhi National Centre for the Arts

न०

वि-रा-ष ॥२॥ ष्ट्यं शूद्रस्य तु शूद्राणां चोपवासैः शुद्धिर्दिनेन वा पुनः। गां वा दत्त्वा वृषं वैकं ब्राह्मणाय विशुध्यतीति बृहदंगिरसोक्तं ज्ञेयं॥ स्नात
कस्य विशेषमाह॥ वेदविद्याव्रतस्नातः शुना दष्टो द्विजो यदि। सहिरण्योदकैः स्नात्वा घृतं प्राश्य विशुध्यति॥३॥ वेदं विद्याश्चद
शपुराणाद्याः समाप्य स्नातो व्रतानि मुद्रानाम्न्यादीनि सोमप्राजापत्यादीनि वा समाप्य स्नातः उभयं वा समाप्य स्नातो द्विजस्त्रैव
२४ र्णिकः श्वादिदष्टो हिरण्यसंसृष्टोदकैः स्नात्वा घृतं प्राश्य विशुध्यति। एतदसंभवे बौधायन आह॥ वेदविद्याव्रतस्नातः
शुना दष्टस्तु ब्राह्मणः॥ शतपर्यायमावर्त्य गायत्रीं शुद्धिमाप्नुयादिति। ब्राह्मण इति त्रैवर्णिकोपलक्षणं। ब्रह्मचारि
णो विशेषमाह॥ सव्रतस्तु शुना दष्टो यस्त्रिरात्रमुपावसेत्। घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत्॥४॥ सव्रतो ब्रह्म
चारी यदि श्वादिभिर्दष्टस्स त्रिरात्रमुपोष्य चतुर्थेऽहनि घृतं कुशोदकं च पीत्वा व्रतशेषं समापयेत् समावर्तेत॥ एतदसंभ
वे बौधायनोक्तं सव्रतस्तु शुना दष्टस्त्रिरात्रमुपवासयेत्। सघृतं यावकं पीत्वा व्रतशेषं समापयेदिति द्रष्टव्यं। उक्तप्रायश्चि
त्तं न कर्तव्यमाह॥ अव्रतः सव्रतो वापि शुना दष्टो भवेद्द्विजः। प्रणिपाताद्भवेत्पूतो विप्रैश्चक्षुर्निरीक्षितः॥५॥ अव्रतो
गृहस्थादिः सव्रतो ब्रह्मचारी श्वादिदष्टः पूर्वोक्तप्रायश्चित्ताचरणानंतरं ब्राह्मणान् प्रणिपत्य तैर्विप्रैश्चक्षुर्भिर्निरी यी-कृष्ण
क्षितः पूतो भवति॥ ब्राह्मणासंभवेऽपि दर्शनं स्वयमेकार्यं तदाहांगिराः। अव्रती सव्रती वापि शुना दष्टस्तु यो द्विजः ॥२॥

दृष्ट्वाग्नीन्हूयमानांस्तु सद्य एव शुचिर्भवेदिति नेदं प्रायश्चित्तांतरमिति शंकनीयं अन्यथानर्थक्यन्यायेन पूर्वोक्तप्रायश्चित्ता
नर्थक्यप्रसंगात्। तस्मात्प्रकरणात्पूर्वोक्तप्रायश्चित्तानामुत्तरांगमिति॥ दंशाभावेऽपि श्वादिघ्राणाद्युपघाते विशेषमाह
॥ शुनाघ्रातावलीढस्य नखैर्विलिखितस्य च। अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनं॥६॥ यस्तु श्वादिभिर्दष्टो न किंतु
केवलं नासिकयाघ्रातो जिह्वयावलीढो नखैर्वा विलिखितः स सर्वोपि तं देशं प्रक्षाल्य वह्निना पर्यग्निकृत्य शुद्धः स्यात्। स्त्री
णां विशेषमाह॥ ब्राह्मणी तु शुना दष्टा जंबुकेन वृकेण वा। उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत्॥७॥ श्वादिदष्टा
ब्राह्मणी रात्रावुदितान्सोमभौमादीन्ग्रहानश्विन्यादीनि नक्षत्राणि चावलोक्य शुद्धा भवति॥ क्षत्रियादिस्त्रीणां वि
शेषोऽन्यत्र दर्शितः॥ त्रिरात्रमेवोपवसेच्छुना दष्टा तु सव्रता॥ सघृतं यावकं भुक्त्वा व्रतशेषं समापयेदिति॥ रजस्वला
यां विशेषमाह * पुलस्त्यः॥ रजस्वला यदा दष्टा शुना जंबुकरासभैः। पंचरात्रं निराहारा पंचगव्येन शुध्यति। ऊर्ध्वं तु द्विगुणं
नाभेर्वक्त्रे तु त्रिगुणं तथा॥ चतुर्गुणं स्मृतं मूर्ध्नि दष्टे चान्यत्राप्लुतिर्भवेदिति॥ अन्यत्र रजस्वलावस्थायामाप्लुतिः स्नानं त
त्रमलेऽप्युपलक्षितमेवेति। कृष्णपक्षादौ सोमदर्शनासंभवे किं कार्यमित्यत आह॥ कृष्णपक्षे यदा सोमो न दृश्येत कदा
चन॥ यां दिशं व्रजते सोमस्तां दिशं वावलोकयेत्॥८॥ कृष्णपक्षे कदाचिद्दुर्दिनादौ वा यदा सोमो न दृश्यते तदा यस्यां दिशि

Indira Gandhi National Centre for the Arts

वि·रा·५ ॥३॥

सोमः संलाप्यते प्राच्यां प्रतीच्यां वा तां दिशमवलोकयेत्॥ सोमदर्शनं पंचगव्यप्राशनस्याप्युपलक्षणं अत एवांगिराः। ब्रा
ह्मणी तु शुनादष्टा सोमे दृष्टिं निपातयेत्। यदा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत्॥ यां दिशं तु गतः सोमस्तां दिशं वाव
लोकयेत्। सोममार्गेण सा पश्चात्पंचगव्येन शुध्यतीति। सोमदर्शनाभावे समुद्रदर्शनाद्वा शुद्धिः स दाह बौधायनः॥ ब्राह्म
णी तु शुनादष्टा सोमे दृष्टिं निपातयेत्। समुद्रदर्शनाद्वापि शुनादष्टा शुचिर्भवेत् इति उक्तप्रायश्चित्तव्याख्यानंतरं
ब्राह्मणप्रणिपातनिरीक्षणाभ्यां शुद्धिरित्युक्तं ब्राह्मणासन्निधाने तु कथमित्यत आह॥ असद्ब्राह्मणके ग्रा
मे शुनादष्टो द्विजोत्तमः। वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत्॥८॥ यस्मिन्ग्रामे ब्राह्मणाः न संति तत्र श्वादि
दष्टो ब्राह्मणः स्नानानंतरं वृषभं प्रदक्षिणीकृत्य शुद्धः स्यात्॥ नन्विदं श्वादिदंशे प्रायश्चित्तमनुपपन्नं तस्य विधिप्र
तिषेधातिक्रमरूपत्वाभावेन प्रत्यवायाजनकत्वात्॥ न दृष्टा वेचन द्विजा शाकं प्रायश्चित्तमर्थकमिति वेद्यं सत्यं प्राय
श्चित्तविधानान्यथानुपपत्त्या कल्पिते प्रत्यवायसद्भावे ऐहिकतद्भावनिश्चयेपि जन्मांतरीयकारणजन्यप्रत्यवा
यसद्भावकल्पनादिति नानुपपत्तिः। श्वादिदष्टस्य तत्र किमुत्यंतो प्रायश्चित्तं वक्ष्यति षष्ठाध्याये एवं नवभिः श्लो श्रीहरः ॥३॥
कैः श्वादिदंशप्रायश्चित्तमभिधाय शुनादुर्मृतस्याहिताग्नेः संस्कारमाह॥ चंडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि।

आहिताग्निर्मृतो विप्रो विषेणात्महतो यदि॥९॥ दहेत्तं ब्राह्मणं विप्रो लोकाग्नौ मंत्रवर्जितं॥ ब्राह्मण्यां शूद्राज्जात
श्चंडालः ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा॥ शूद्राज्जातस्तु चंडालः सर्वधर्मबहिःकृत इति योगिस्मरणा
त्॥ क्षत्रायामुग्राज्जातः श्वपाकः उग्रात्तु जातः क्षत्रायां श्वपाक इति कीर्तित इति मनुस्मरणात्॥ तास्यां गोभिर्वा
यद्याहिताग्निर्विप्रो हतः प्रहृतः सन् मृतः प्राणैर्विमुक्तः यदि वा विषेण विषादिने वहतो मृतस्तदा सयथ्यपि सपिंड
एव कश्चिद्विप्रो लौकिकेनाग्निना मंत्रैर्विनिवृतं दहेत्। नन्वेतादृशस्य दहनं सर्वाध्यायादौ निषिद्धमिति कथमत्रोच्य
त इत्यत आह॥ स्पृष्ट्वा वोढ्वा च दग्ध्वा च सपिंडेषु च सर्वथा॥ प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनात्॥१०॥ पू
र्वोक्तचंडालादिहतमात्महनं सपिंडेष्वन्यतमो विप्रः स्पृष्ट्वा वोढ्वा दग्ध्वा च पश्चाद्विप्रानुशासनाद्विप्राज्ञया सर्वथा प्रा
जापत्यं चरेत्॥ अनेन पश्चात्सर्वथेति पदद्वयप्रयोगेण बुद्धिपूर्वकं निषेधातिक्रमेण दाहादिकं कृत्वा प्रायश्चित्त
मिति गम्यते॥ न तु प्रमादिके तत्करणे प्रायश्चित्तमनेनोच्यत इति तथा स तिदग्ध्वास्थीनि पुनर्दहेदिति नियमस्य पू
र्वदाहानुवादेन पुनर्दाहविधानमग्रेणोपपद्येत॥ न च चतुर्थाध्यायादौ दुर्मृतवहनादिप्रायश्चित्तविधानादेतस्य पौन

Indira Gandhi National Centre for the Arts

रुक्तं वाच्यं एतस्याहिताग्निविषयत्वेन सर्वाकृत्यसामान्यरूपतया नाहिताग्निविषयत्वात्॥ प्राजापत्यचरणानंतरं किं कार्यमित्यतस्त्रा
ह॥ दग्ध्वास्थीनि पुनर्गृह्य क्षीरेण क्षालयेत्ततः। स्वेनाग्निना स्वमंत्रेण पृथगेव पुनर्दहेत्॥ स्व॥ उक्तरीत्या दुर्मृतमाम्नहतं वद्ग्ध्वात
तीयाह्न्यस्थीनि पुनर्गृह्य गृहीत्वा क्षीरेण प्रक्षाल्य द्विजो विशद्धिश्चेन्मृतो नस्मार्तेन वाग्निना स्वमंत्रेण स्वकल्पोक्तमंत्रकलापेन पृथक्का
लांतरे संवत्सरांते पुनर्दहेत्॥ नदेत सर्वमाहहारीतः। बाल्याद्वयसि शाठ्यो वंडाल्लस्यकरेथवा। आत्मनाशस्त्रबालेनवशश्च वद्ध
ह्ययेद्विजं॥ प्राजापत्यं चरेत्पश्चात् सपिंडेष्वेव समसमात्॥ तद्भस्मास्थि गृहीत्वैव विप्राणामनुशासनात्। क्षीरप्रक्षालनं कुर्यात् दक्षिणे
न वह्निना॥ पुनर्दहेत्तमंत्रेश्च यथाविधि समाचरेत्। एवमेव विधिं कुर्यान्मरणे गर्हितस्य वै तु॥ संवत्सरांत इत्युक्तं षट्त्रिंशन्मते। गोब्राह्म
णहतानां च पतितानां तथैव च। ऊर्ध्वं संवत्सरात्कुर्यात् सर्वमेवौर्ध्वदेहिकमिति। और्ध्वदेहिकं नारायणबलिपूर्वकं कार्यमित्याह छागले
यः। नारायणबलिः कार्यो लोकगर्हाभयान्नरैः तथा तेषां भवेच्छौचं नान्यथेत्यब्रवीद्यमः॥ ति नारायणबलिस्वरूपं चवेष्णवे सिहितं एका
दश्यां समासाद्य शुक्लपक्षस्य वै तिथिं। विष्णुं समर्चयेद्देवं यममेव वस्वतं तथा दश पिंडान्घृताभ्यक्तान् दर्भेषु मधुसंयुतान्॥ तिल
मिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः॥ विष्णुबुद्ध्या समनसा घनं वसिनतः क्षिपेत्॥ नामगोत्रग्रहं तत्र पुष्पैरभ्यर्चनं तथा॥ धूपदीपप्र
दानं च भक्ष्यभोज्यं तथापरं॥ निमंत्रयेत विप्रांश्च समपंचनवापि वा॥ विधानपःसमृद्धांश्च कुलोत्पन्नान्समाहितः॥ अपरेहनि संप्राप्ते श्रीकृष्ण ॥४॥

---

मध्याह्ने समुपोषितः॥ विप्रान्सर्वेनांस्तुत्वा विप्रांस्तानुपवेशयेत्॥ उदङ्मुखान्यथाज्येष्ठं पितृरूपमनुस्मरन्। मनो निवेश्य विष्णौ वै सर्वं कुर्या
त्तंद्रितः। आवाहनादियत्प्रोक्तं दैवपूर्वं न दाचरेत्। तृप्तान्ज्ञात्वा ततो विप्रान्तृप्तिं पृष्ट्वा यथाविधि। हविष्यव्यंजनेनैव तिलादिसहितं
नव॥ पंच पिंडान्प्रदद्याद्वै देवरूपमनुस्मरन्॥ प्रथमं विष्णवे दद्यात् ब्रह्मणे च शिवाय च। यमाय सानुचराय चतुर्थं पिंडमुत्सृजेत्। मृतं
संकीर्त्य मनसा गोत्रपूर्वमतः परं। विष्णोर्नाम गृहीत्वैवं पंचमं पूर्ववत् क्षिपेत्॥ विप्राना च म्यविधिवद्दक्षिणाभिः समर्चयेत्। एकं तु इतमं
विप्रं हिरण्येन समर्चयेत्॥ गवा च हेम्ना भूम्या च प्रेतं तं मनसा स्मरन्॥ तत्तिलांश्चैव विप्रास्तु हस्ते दर्भसमन्वितैः॥ क्षिपेयुर्गोत्रपूर्वं तु ना
म बुद्धौ निवेश्य वा। हविर्गंधतिलोपेतं तस्मै दद्युः समाहिताः। मित्रभृत्यजनैः सार्धं पश्चाद्भुंजीत वाग्यतः। एवं विष्णुमतः स्थित्वा योद
द्यादात्मघातिने॥ समुद्धरति तं क्षिप्रं नात्र कार्या विचारणेति॥ सर्पदंशेतु विशेषो निहितो विष्णुपुराणे॥ सुवर्णानार निष्पन्नं नागं
त्वा तथैव गां। व्यासाय दत्वा विधिवत्पितुरानृण्यमाप्नुयात्॥ तदूति ननु दुर्मृतानां लौकिकाग्निना दाहो नुपपन्नः॥ तद्देहस्य गंगादौ प्रक्षि
प्तिस्मरणात्॥ न थावस्मृत्यंतरे। आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया। तेषामपि तथा गंगातोये संस्थापनं हितमिति तिल
था स्याग्निना पुनर्दाहो प्यनुपपन्नः। वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे। पात्राणि तु दहेदग्नौ यजमाने वृथा मृते इति अनेनत
दग्नीनां प्रतिपत्तिविधानादिति चेत्॥ बाढं। स्मृतिलोककल्पादनयोः कल्पांतरविधायकत्वेनानुपपत्तिपरिहारात्॥ तर्हि कल्पांतरेप्यौर्ध्व

देहिकं कथं स्याद्देहाग्न्योः प्रतिपादितत्वेन दाहासंभवादिति चेत्॥ सत्यं देहाग्नि प्रतिपत्त्या दाहलोपेन तदुत्तरकालीनायाउदकक्रियाया
एवानेष्टत्वात्। अत एव त्रिकांडमंडनः॥ अग्नौ सति स्याद्यदि देहनाशोऽग्निरस्थ्नामिव दग्निरपेक्षणीयः॥ अस्थ्नामभावे त्वशरीरक
स्य विनष्टदेहस्योदकक्रियैवेति। अस्यार्थः॥ अग्नौ सति दृशांतरमरणादिना देहास्थ्यभावे पलाशवृंतादिभिर्देहं कल्पनी
यः। देहास्थिसद्भावे तेनाधानादिना विछिन्नोऽप्यग्निराहरणीयः॥ उक्तप्रतिपत्त्यादिना देहास्थ्नोरग्नेश्चाभावे उदकक्रियामात्रस्यौर्ध्व
देहिकं कार्यं उभयप्रतिपत्त्या दाहस्य लुप्तत्वात्॥ अत एव गोनमोऽपि यस्य प्राणांतिकं प्रायश्चित्तं स मृतः शुध्येत्तस्मिन्नुदकदाना 
दीनि सर्वाणि प्रेतकार्याणि कुर्युरित्युदकादीन्येवोक्तवान्। नतु दाहादीनीति। न च दाहाभावे शरीरसंस्काराभावादुत्तरक्रियास्व
नधिकार इति वाच्यं॥ संन्यासिनो निखननस्यैवात्र गंगातोयप्रक्षेपस्यैव तत्संस्कारकत्वात्॥ न चोर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौ
र्ध्वदैहिकमिति सर्वत्वश्रुतिविरोधः शंकनीयः। सर्वत्वमाधिकारिकमिति न्यायेन दाहातिरिक्तस्यैवाधिकृतस्य सर्वशब्देन परामर्शा
दित्यलमतिविस्तरेण॥ एवं सार्धश्लोकत्रयेणादुर्मृतस्याहिताग्नेः संस्कारोऽभिहितः इदानीं प्रोषितस्य देहक्लृप्तिं सार्धदशभिः 
श्लोकैराह॥ आहिताग्निर्द्विजः कश्चित्प्रवसन्कालचोदितः॥ देहनाशमनुप्राप्तस्तस्याग्निर्वसते गृहे॥१३॥ प्रेताग्निहोत्रसं
स्कारः श्रूयतामृषिपुंगवाः॥ ॥ आहिताग्निः श्रौताग्निमान्द्विजस्त्रैवर्णिकः कालेन चोदितो वशीकृतः प्रवसन्देशा

---

न्तरस्थ एव देहनाशं मरणं प्राप्तस्तस्य चाग्निर्गार्हपत्यादिर्गृहे वसते नृताग्निहोत्रविधिनायाल्यमानः तिष्ठति चेत्तदा प्रेतस्यापि गृहे विद्यमान
स्याग्निहोत्रस्याग्नित्रयस्य च यः संस्कारः सः सोऽस्माभिः प्रमुखाः ऋषिपुंगवाः श्रूयतां। प्रायश्चित्तप्रस्तावे ह्याहिताग्निसंस्कारस्यासंग
तिपरिहाराय पुनरवधानदानं मरणादिशब्देनैवार्थसिद्धौ देहनाशशब्दोऽस्थ्नामप्यलाभसमुच्चयनाय तदलाभ एव पालाशप्रतिकृति
विधानात्॥ अत एव छंदोगपरिशिष्टे। विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा। दाहयेदूर्णया छाद्य पात्रन्यासादि पूर्ववत्॥
अस्थ्नामभावे पर्णानि सकलान्युक्तयावृता। तिप्रतिज्ञातं प्रेतसंस्कारमाह। कृष्णाजिनं समास्तीर्य कुशैस्तु पुरुषाकृतिं॥१४॥
कृष्णमृगस्याजिने आस्तीर्णे कुशैः पुरुषस्याकारं कुर्यात्। कुशग्रहणं च कदाहेन तस्य सादृश्यधारणमिति लिंगात्। कुशाभावे
द्रव्यांतरमाह। षट्शतानि शतं चैव पलाशानां च वृंततः। चत्वारिंशच्छिरे दद्यात् कंठे तु विन्यसेत्॥१५॥ कुशाभावे तस्मिन्नेव
कृष्णाजिने षट्शतानि शतं चेत्येवं सप्तशतानि पलाशानां पर्णप्रत्राणां वृंततो वृंतानि सावयवविसंक्लिकन्यान्न सिलः यथोक्तवि
भागेन विन्यसेत्। पलाशवृंतानां कुशसमानकार्यत्वेन वशात् स्यच्चाशब्दार्थेन यद्विकल्पाभिधानात्पक्षांतरमेतत्। एवं पदर्श
रत्वेनेति लिंगात्। विभागे संख्यामाह॥ शिरे शिरसि चत्वारिंशत् कंठे च शतं दद्यादिति। अंगांतरेष्वपि तमाह। बाहुभ्यां दशकं
दद्यादंगुलीषु दशैव तु। शतं तु जघने दद्याद्विशतं तूदरे तथा॥१६॥ दद्यादष्टौ वृषणयोः पंचमेढ्रे तु विन्यसेत्। एकविंश

विरा०५
॥६॥

निरूरूत्यां द्विशतं जानुजंघयोः॥१७॥ पादांगुष्ठेषु दद्यात्षट् यत्तपात्रं ततोन्यसेत्॥ बाहुद्वये पंच पंचेत्येवं दश करांगुलीषु प्रत्येकमे
केकमेवं दश जत्रुने शतं उदरे शतद्वयं वृषणयोः प्रत्येकं चत्वारि चत्वारीत्येवमष्टौ मेदु शिश्ने पंच ऊरुद्वये एकविंशतिः प्रत्येकं
सार्द्धदश विभागेन समं स्यादस्तुतत्वादिति न्यायात् जानुद्वये जंघाद्वये जानुजंघं तद्द्वये प्रत्येकं शतमेवं शतद्वयं पादांगुलीषु
पंचसु पंचसु त्रीणि त्रीणीति षट् एवं यथोक्तसंख्याविभक्तैः पलाशवृंतैर्देहाकृतिं निर्माय तदुपरि यद्रूपाणि विन्यसेत्तान
मेव पात्रविन्यासमाह॥ शम्यां शिश्ने विनिक्षिप्य अरणीं मुष्कयोरपि॥१८॥ जुहूं च दक्षिणे हस्ते वामे तूपभृतं न्यसेत्॥
पृष्ठे तूलूखलं दद्यात्पृष्ठे तु मुसलं न्यसेत्॥१९॥ उरसि क्षिप्य दृषदं तंदुलाज्यतिलान्मुखे॥ श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्था
ली च चक्षुषोः॥२०॥ कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत्॥ अग्निहोत्रोपकरणमशेषं तत्र विन्यसेत्॥२१॥ असौ स्व
र्गाय लोकाय स्वाहेत्येकाहुतिं सकृत्॥ दद्यात्पुत्रोथवा भ्राताप्यन्यो वापि सबांधवः॥२२॥ यथादहनसंस्कारस्तथाका
र्यं विचक्षणैः॥२३॥ शिश्ने शम्यां मुष्कयोरंडकोशयोररणिं दक्षिणोत्तरयोर्हस्तयोर्जुहूपभृतावुलूखलमुसले पृष्ठे उ श्रीकृष्ण
रसि दृषदं मुखे तंदुलाज्यतिलान् श्रोत्रे प्रोक्षणीं चक्षुषोराज्यस्थालीं कर्णाक्षिघ्राणमुखेषु हिरण्यशकलमेवं स्व ॥६॥

कल्पानुसारेणाशेषमग्निहोत्रोपकरणं स्पष्टमेवमसादितत्र तत्र निक्षिप्या सावित्रिमंत्रेणैकामाज्याहुतिं शववद्देहे हुत्वा पुत्रादिः कर्ता
स्वशाखोक्तरीत्या दहेदिति॥ अन्ये तु देशांतरगते विप्रे विपन्ने कालपर्ययात्॥ शरीरनाशे कल्पः स्यादाहिताग्नेर्विशेषतः॥ कृष्णाजिनमथा
स्तीर्य पुरुषाकृतिमेव च॥ त्रीणि षष्टिशतान्यत्र वृंतानां पलाशानां सुसमाहितः॥ अशीत्यर्द्धं शिरे दद्याद्ग्रीवायां दश चैव हि॥ बाह्वोः शतं द
द्यादंगुल्योर्दश एव च॥ उरसि त्रिंशतं दद्याज्जठरे विंशतिं तथा॥ द्वादशार्द्धं वृषणयोरष्टार्द्धं शिश्न एव तु॥ ऊर्वोः शतं दद्यात्त्रिंशतं
जानुजंघयोः॥ पादांगुल्योर्दशं दद्यादेतत्प्रेतस्य कल्पनं॥ तथा नारिकेलं शिरस्येव कपाले ताम्रभाजनं॥ चक्षुषोर्मौक्तिकं दद्यादोष्ठ
दद्यात्प्रवालकं दंतेषु दाडिमीबीजं केशेषु चमरं तथा॥ कस्तूरिकां नासिकायां कर्णयोः शिंबिकां तथा॥ नखे कपर्दकान्दद्याच्छिश्ने च
त्रं५ कदलीफलं॥ वृंताकं मुष्कयोर्दद्याद्रक्तैर्गुल्वकं तथा॥ वीर्ये च पारदं पित्ते हरितालं मनःशिलां॥ मज्जायां हृदये चैव कजंवीरफलमेव च॥ ऊर्णा
सूत्रेणापि संवेष्ट्य यवपिष्टेन लेपयेत्॥ नामगोत्रे समुच्चार्य वस्त्रेणाच्छादयेदपि॥ पुनः प्राणेति मंत्रेण प्राणान्संवेशयन्त्रत्र॥ एवं पर्णन
रं कृत्वा दहेच्च विधिपूर्वकमित्यादयो हारीताद्युक्तिहिताः संख्याविनियोगविशेषास्तेपि शाखाभेदेन युगभेदेन वा व्यवस्थापनीयाः
यद्यप्याहिताग्निमुपक्रम्यायं विधिराम्नातस्तथाप्यन्यस्याप्ययं भवति॥ अनाहिताग्नेर्देहस्तु दाह्यो गृह्याग्निना द्विजैः॥ न दलाचेत्पला
शोत्थैः पत्रैः कार्यस्तु मानवीति ब्रह्मपुराणात्॥ यदि पर्णदाहे क्रियमाणे न दग्धो निलत्वं तेन तदा दर्भगंधकाष्ठानि निर्मथ्य तेनाग्नि

Indira Gandhi National
Centre for the Arts

धि·रा·५
॥७॥

हा२

नानान्यपिदहेत्॥समाप्तेतुदाहेऽर्धदग्धकाष्ठान्यवैतानिजलेप्रक्षिपेत्॥तदाहब्रह्मपुराणे॥अर्धपर्णनरेदग्धे पाणिन्यासेकृतेसति॥ण
नेष्वग्निषुतद्दाघदग्धेलक्ष्यतेकचित्॥तदर्धदग्धकाष्ठानितानिनिर्मथ्यतंदहेत्॥यद्यर्धदग्धकाष्ठंतुतदीयंवनलक्ष्यतेऽन्तदानदस्त्रिरवे
डंतुनिक्षेप्तव्यंमहाजलइति॥उक्तविधेरन्वयव्यतिरेकाभ्यांफलमाह॥इदृशंतुविधिंकुर्याद्ब्रह्मलोकगतिःस्मृता॥दहंतियेद्वि
जास्तंतुतेयांतिपरमांगतिं॥२४॥अन्यथाकुर्वतेकर्मत्वात्मबुध्याप्रचोदिताः॥भवंत्यल्पायुषस्तेवैपतंतिनरकेष्वथो॥२५॥य
स्याहिताग्नेरीदृशंविधिंकुर्यात्तस्यब्रह्मलोकगतिःस्मृताप्रवेः॥येतुतमाहिताग्निमुक्तरीत्यादहंतितेऽपिपरांगतिंयांति॥आत्म
बुध्यान्यथाकारिणामल्पायुष्ट्वंनरकयातनाश्चेति॥॥नेत्रेनिद्रावद्धिहारसद्द्वमक्षुरःअममूर्द्धैववेत आवेवंचद्वैपीवीतिनंदइवत्तु
यांलक्ष्मीसंसक्तिलाजो॥दृष्टःसंकीर्तितोवाहृदितुकथमपिध्यातव्याप्तितोलन्नलेपर्कमाआदपल्लपतिनरातहृषीकेशमीडे॥
॥२॥धर्माधिकारिकुलकैरवकाननेंदुश्रीरामपण्डितसुतेनविनायकेनासंस्कारसिद्धिमतिधातुमिहाहिताग्नेर्व्याप्तएषविहितः
किलपंचमोपि॥२॥इतिश्रीधर्माधिकारिरामपण्डितात्मजनंदपण्डितापरनामधेयविनायकपण्डितकृतायांपराशरस्मृतौ
विद्वन्मनोहरायांपंचमोध्यायः॥५॥ शुभमस्तु॥ ॥ छ ॥ श्री॥ छ ॥ ॥ ॥ छ॥ ॥ ॥ ॥ ॥

श्रीकृष्ण
॥७॥

Indira Gandhi National Centre for the Arts